# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा – आचार्य-२ (SEM-3) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
| विषयः - सर्वदर्शनम् | CC- 5.3.8 | समयः – ११ तः ०२ पर्यन्तम् |
| दिनाङ्कः – २६/११/२०१६ | सन्दर्भग्रन्थः –न्यायसूत्रवात्स्यायनभाष्यम् – प्रथमाध्यायस्य प्रथमाह्निकम् | |

प्रथमान्वितिः (युनिट-१)

प्रश्नः -१ **द्वयोरेकस्य समाधानं यथाभाष्यं देयम् ।** ०४

(१) न्यायवैशिष्ट्यं यथाभाष्यं प्रतिपादयत ।

(२) चत्वार्यर्थपदानि सभाष्यं विवेचयत ।

प्रश्नः -२ **द्वयोरेकस्य विस्तृतव्याख्या देया।** १२

(१) गौतमोक्तषोडशपदार्थानां भाष्योक्तदिशा व्याख्यां प्रतिपादयत ।

(२) अपवर्गस्वरूपं, न्यायशास्त्रस्य वैशिष्ट्यं च व्याख्यात ।

प्रश्नः -३ **निम्नेषु कयोश्चिद् द्वयोः सभाष्यमुत्तरं देयम् ।** ०४

(१) युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।

(२) आप्तोपदेशः शब्दः।

(३) अथ तत्पूर्वकं त्रिविधमनुमानम्।

द्वितीयान्वितिः (युनिट-२)

प्रश्नः -४ **द्वयोः एकस्य उत्तरं भाष्यसहितं देयम् ।** ०४

(१) इन्द्रियार्थेति प्रत्यक्षसूत्रं भाष्यदिशा विशदयत ।

(२) "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" व्याख्यात ।

प्रश्नः -५ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १२

(१) आत्मशरीरेन्द्रियार्थेति प्रमेयसूत्रं यथाभाष्यं व्याख्यात ।

(२) "दृष्टान्त"स्वरूपम् विवृणुत।

प्रश्नः -६ **चतुर्णाम् अतिलघूत्तराणि लिखत ।** ०४

(१) भाष्यकारः कः?

(२) न्यायप्रवर्तकः कः?

(३) वैशेषिकमते प्रमाणानि कति ?

(४) तर्कशास्त्रमिति कस्य दर्शनस्य नाम?

(५) किं नाम उपमानम् ?

(६) प्रेत्यभावः कः?

तृतीयान्वितिः (युनिट-३)

प्रश्नः -७ **एकस्य यथाभाष्यं व्याख्यां कुरुत।** ०४

(१) "तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः"।

(२) अपवर्गसूत्रं सभाष्यं न्यायदिशा विवेचयत।

प्रश्नः -८ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** ०८

(१) निर्णयस्य स्वरूपं विवेचयत।

(२) कथात्रयस्य सारं विवृणुत।

प्रश्नः -९ **एकैकवाक्येन त्रयाणाम् उत्तरं लेखनीयम्।** ०३

(१) किं शरीरम्?

(२) अनर्थान्तरं किम्?

(३) फलं किम्?

(४) भूतानि कानि?

(५) प्रतिज्ञा का?

चतुर्थान्वितिः (युनिट-४)

प्रश्नः -१० **एकस्य उत्तरं भाष्यसहितं देयम्।** ०४

(१) दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः।

(२) प्रमाणनिरूपणसङ्गतिं यथाभाष्यं लिखत।

प्रश्नः -११ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** ०८

(१) अवयवानां व्याख्या यथाभाष्यं स्पष्टयत।

(२) त्रिसूत्रीभाष्यं व्याख्यात।

प्रश्नः -१२ **त्रयाणाम् उत्तराणि एकवाक्येन साधनीयानि।** ०३

(१) हेतोः लक्षणं किम्?

(२) कः निर्णयः?

(३) न्यायदर्शने कति अध्यायाः सन्ति ?

(४) तर्कः कः?

(५) वाग्बुद्धिशरारम्भः कः?

***

# समाधानानि

| कक्षा – आचार्य-२ (SEM-3) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
|---|---|---|
| विषयः - सर्वदर्शनम् | CC- 5.3.8 | समयः – ११ तः ०२ पर्यन्तम् |
| दिनाङ्कः – २६/११/२०१६ | सन्दर्भग्रन्थः –न्यायसूत्रवात्स्यायनभाष्यम् – प्रथमाध्यायस्य प्रथमाह्निकम् | |

प्रश्नः- ६

१. वात्स्यायनः।

२. महर्षिगौतमः।

३. त्रीणि।

४. न्यायदर्शनस्य।

५. प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्।

६. पुनरुत्पत्तिः।

प्रश्वः -९

१. चेष्टेन्द्रियार्थाश्रयः शरीरम्।

२. बुद्धिरुपलब्धिर्ज्ञानमिति।

३. प्रवृत्तिदोषजनितोर्थः।

४. पृथिव्यप्तेजोवायुराकाशमिति।

५. साध्यनिर्देशः।

प्रश्नः-१२

१. उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः।

२. विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः।

३. पञ्च।

४. अविज्ञाततत्त्वेर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहस्तर्कः।

५. प्रवृत्तिः।